## श्रीसारदा-नाम-संकीर्तनम्

### ध्यानम्

ध्यायेद् हृदम्बुजे देवीं तरुणारुण-विग्रहाम्।
वराभयकरां शान्तां स्मितोत्फुल्ल-मुखाम्बुजाम्॥
स्थल-पद्म-प्रतीकाश-पादाम्भोज-सुशोभनाम्।
शुक्लाम्बरधरां धीरां लज्जा-पट-विभूषिताम्॥
प्रसन्नां धर्म-कामार्थ-मोक्षदां विश्व-मङ्गलाम्।
स्वनाथ-वाम-भागस्थां भक्तानुग्रह-कारिणीम्॥

ॐ सर्व-देव-देवी-स्वरूपिण्यै श्रीसारदा-देव्यै नमः।

### संकीर्तनम्

त्वं मे ब्रह्म-सनातनि मा।
सारदयीश्वरी सुभगे मा॥ ध्रु॥

१. ब्रह्मानन्द-स्वरूपिणि मा।
२. ब्रह्म-शक्ति-सुख-दायिनि मा॥
३. सच्चित्सुखमय-रूपिणि मा।
४. सृष्टि-स्थिति-लय-कारिणि मा॥
५. ब्रह्म-सुधाम्बुधि-केलिनि मा।
६. ब्रह्मात्मैक्य-शुभङ्करि मा॥
७. जीवेश्वर-भित्कौतुकि मा।
८. अगाध-लीला-रूपिणि मा॥ त्वं मे ०

९. चिन्मय-रूप-विलासिनि मा।
१०. बहिरन्तर-सुख-वर्धिनि मा॥
११. ज्ञानानन्द-प्रवर्षिणि मा।
१२. दिव्य-रसामृत-वर्षिणि मा॥
१३. मूलाधार-निवासिनि मा।
१४. सहस्रार-शिव-सङ्गिनि मा॥
१५. आद्ये शक्ति-स्वरूपिणि मा।
१६. चिति-सुख-दायिनि तारिणि मा॥ त्वं मे ०

१७. शुभ-मति-दायिनि शाङ्करि मा।
१८. दुर्गति-दुर्मति-नाशिनि मा॥
१९. महाकाल-हृदि-नर्तिनि मा।
२०. जीव-शिवान्तर-वर्तिनि मा॥
२१. जगज्जननि जय-दायिनि मा।
२२. तडिल्लसित-सौदामिनि मा॥
२३. सीतारामा-कारिणि मा।
२४. कृष्ण-राधिका-रूपिणि मा॥ त्वं मे ०

२५. कमनीयाकृति-धारिणि मा।
२६. भव-सागर-भय-हारिणि मा॥
२७. शान्ति-सौख्य-चिर-दायिनि मा।
२८. क्षान्ति-महागुण-वर्षिणि मा॥
२९. कान्ति-वराभय-दायिनि मा।
३०. गिरि-शाङ्कोपरि-वासिनि मा॥
३१. हरार्ध-नारी-रूपिणि मा।
३२. नटन-महेश्वर-सङ्गिनि मा॥ त्वं मे ०

३३. हर-हर्षोत्करि-नर्तिनि मा।
३४. सारदेश्वरी-षोडशि मा॥
३५. साधक-मानस-शोधिनि मा।
३६. सर्व-सुभाग्य-प्रसाधिनि मा॥
३७. गुह-गजमुख-जनि-दायिनि मा।
३८. एकानेक-विभागिनि मा॥
३९. हिम-गिरि-नन्दिनि लासिनि मा।
४०. सर्व-चराचर-सर्जिनि मा॥ त्वं मे ०

४१. सर्व-भवामय-वारिणि मा।
४२. सर्व-जगत्त्रय-साक्षिणि मा॥
४३. निखिलाधीश्वरि योगिनि मा।
४४. एला-गन्ध-सुकेशिनि मा॥
४५. चिन्मय-सुन्दर-रूपिणि मा।
४६. परमानन्द-तरङ्गिणि मा॥
४७. रम्य-कान्ति-चिर-धारिणि मा।
४८. समस्त-सुगुणाभूषणि मा॥ त्वं मे ०

४९. सद्गति-सन्मति-दायिनि मा।
५०. भवतारिणि करुणेश्वरि मा॥
५१. त्रिपुरे सुन्दरि मोहिनि मा।
५२. ब्रह्माण्डोदर-धारिणि मा॥
५३. प्रेमानन्द-प्रवर्षिणि मा।
५४. सर्व-चराचर-पालिनि मा॥
५५. भुवन-चतुर्दश-प्रसविणि मा।
५६. नाना-लीला-कारिणि मा॥ त्वं मे ०

५७. विविध-विभूति-विधारिणि मा।
५८. ज्ञानालोक-प्रदायिनि मा॥
५९. विश्व-क्रीडा-कौतुकि मा।
६०. विश्वाधिष्ठित-चिन्मयि मा॥
६१. मन्द-स्मित-स्मर-हारिणि मा।
६२. भक्तानुग्रह-कारिणि मा॥
६३. योग-भोग-वर-दायिनि मा।
६४. शान्ति-सुधा-निःस्यन्दिनि मा॥ त्वं मे ०

६५. भ्रान्ति-रोग-विष-हारिणि मा।
६६. कान्ति-योग-सुख-दायिनि मा॥
६७. वीर-नरेन्द्र-प्रहर्षिणि मा।
६८. समाधि-चिर-चिति-दायिनि मा॥
६९. वीर्य-बलाभय-कारिणि मा।
७०. ताप-त्रय-भय-हारिणि मा॥
७१. सर्वोत्तुङ्ग-सुवासिनि मा।
७२. प्रसन्न-वरदे भैरवि मा॥ त्वं मे ०

७३. हवन-जपार्चन-साधिनि मा।
७४. चण्डासुर-खल-घातिनि मा॥
७५. सकल-देव-जय-साधिनि मा।
७६. दुष्ट-मुण्ड-वध-कारिणि मा॥
७७. चामुण्डेश्वरि दर्पिणि मा।
७८. माहिष-दर्प-विनाशिनि मा॥
७९. माहेश्वर-सुख-वर्धिनि मा।
८०. महिषासुर-खल-मर्दिनि मा॥ त्वं मे ०

८१. त्रिगुण-त्रिलोक-त्रिरूपिणि मा।
८२. निर्गुण-सगुण-विचित्रिणि मा॥
८३. कारित-ध्यानानन्दिनि मा।
८४. दर्पण-चित्त-विभासिनि मा॥
८५. चेतो-दर्पण-काशिनि मा।
८६. नव-नव-रूप-सुदर्शिनि मा॥
८७. समस्त-लोकोद्धारिणि मा।
८८. रामकृष्ण-नव-रूपिणि मा॥ त्वं मे ०

८९. धर्म-ग्लानि-विनाशिनि मा।
९०. धर्म-स्थापन-कारिणि मा॥
९१. रम्य-सहज-पथ-दर्शिनि मा।
९२. मातृ-भाव-सुख-शोधिनि मा॥
९३. निर्मल-भक्तोत्कर्षिणि मा।
९४. दिव्याद्भुत-चरितार्थिनि मा॥
९५. रामकृष्ण-सहधर्मिणि मा।
९६. जयरामाख्य-सुवाटिनि मा॥ त्वं मे ०

९७. मृग-केसरि-वर-वाहिनि मा।
९८. दुर्ग-हिमाचल-नन्दिनि मा॥
९९. नरेन्द्र-हृदय-निवासिनि मा।
१००. लोकोत्तर-कृति-दर्शिनि मा॥
१०१. सुन्दर-रूप-विकासिनि मा।
१०२. दिव्य-गुणाकर-धारिणि मा॥
१०३. दुर्बल-सबल-सुकारिणि मा।
१०४. दुःख-दैन्य-भय-नाशिनि मा॥ त्वं मे ०

१०५. सर्व-भूत-हित-साधिनि मा।
१०६. समस्त-लोकाभय-करि मा॥
१०७. दुर्गति-नाशिनि दुर्गे मा।
१०८. नारायणि जगदाद्ये मा॥
जय जय जय जगदाद्ये मा।
नारायणि जय दुर्गे मा॥ त्वं मे ०

### स्तवः

अनन्त-रूपिणि अनन्त-गुणवति
अनन्त-नाम्नि गिरिजे मा।
शिव-हृन्मोहिनि विश्व-विलासिनि
रामकृष्ण-जय-दायिनि मा॥
जगज्जननि त्रिलोक-पालिनि
विश्व-सुवासिनि शुभदे मा।
दुर्गति-नाशिनि सन्मति-दायिनि
भोग-मोक्ष-सुख-कारिणि मा॥
परमे पार्वति सुन्दरि भगवति
दुर्गे भामति त्वं मे मा।
प्रसीद मातर्नगेन्द्र-नन्दिनि
चिर-सुख-दायिनि जयदे मा॥

### प्रणामः

यथाग्नेर्दाहिका-शक्ती रामकृष्णे स्थिता हि या।
सर्व-विद्या-स्वरूपां तां सारदां प्रणमाम्यहम्॥

इति श्रीसारदा-नाम-संकीर्तनं समाप्तम्॥